"शवोपरिसमासीनां रक्ताम्बरपरिच्छदाम् ।
रक्तालङ्कारसंयुक्तां गुञ्जाहारविभूषिताम् ॥"
इति तन्त्रसारधृतसुच्छिष्टचाण्डालिनीध्यानम् ॥
तद्युक्ते, त्रि ॥

रक्ताम्रः, पुं, (रक्तवर्णः आम्रः ।) कोशाम्रः । इति राजनिर्घण्टः ॥ (विवरणमस्य कोशाम्र-शब्दे ज्ञातव्यम् ॥)

रक्ताम्लानः, पुं, (रक्तेन रक्तवर्णेन आ सम्यक् म्लायते इति । म्लै + क्तः । समधिकरक्तवर्णत्वा-त्तथात्वम् ।) रक्तवर्णपुष्पविशेषः । तत्पर्य्यायः । रक्तसहा २ अपरिम्लानः ३ रक्ताम्लानकः ४ राग-प्रसवः ५ रक्तप्रसवः ६ कुरवकः ७ रामालिङ्गन-कामः ८ बधूत्सवप्रसवः ९ सुभगः १० भ्रमरा-नन्दः ११ । अस्य गुणाः । कटुत्वम् । उष्णत्वम् । वातामयशोफज्वराध्मानशूलकाशश्वासार्त्तिशश-मनत्वम् । वर्ण्यत्वञ्च । इति राजनिर्घण्टः ॥

रक्तार्म्म, [न्] क्ली, (रक्तं ऋच्छतीति । ऋ + मन् ।) नेत्ररोगभेदः । तस्य लक्षणं यथा,—
"पद्माभं मृदु रक्तार्म्म यन्मांसं चीयते सिते ॥"
इति माधवकरः ॥

रक्तार्ब्बुदः, पुं, क्ली, (रक्तानामर्ब्बुदमत्र ।) रोग-विशेषः । यथा, शातातपीयकर्म्मविपाके ।
"जलोदरयकृत्प्लीहशूलरोगव्रणानि च ।
श्वासाजीर्णज्वरच्छर्द्दिभ्रममोहगलग्रहाः ।
रक्तार्ब्बुदविसर्पाद्या उपपापोद्भवा गदाः ॥"
इति मलमासतत्त्वम् ॥ * ॥

"रक्तार्ब्बुदमाह ।
'दोषप्रदुष्टा रुधिरं शिराश्च
सङ्कोच्य संपीड्य ततस्त्वपाकम् ।
सस्रावमुन्नह्यति मांसपिण्डं
मांसाङ्कुरैराचितमाशु वृद्धिम् ॥
स्रवत्यजस्रं रुधिरं प्रदुष्ट-
मसाध्यमेतद्रुधिरात्मकन्तु ।
रक्तक्षयोपद्रवपीड़ितत्वात्
पाण्डुर्भवेदर्ब्बुदपीड़ितश्च ॥'
दोषोऽत्र पित्तं रुधिरं शिराश्च सङ्कोच्य संपीड्य संहतीकृत्य मांसाश्रयोः सर्व्वेष्वर्ब्बुदेषु दूष्यत्वं रक्तेऽपि तु विशेषतो रक्तदुष्टिः एवं मांसार्ब्बुदे विशेषतो मांसदुष्टिर्बोद्धव्या । ततो मांसपिण्ड-मुन्नह्यति उन्नतं करोति । अपाकं ईषत्पाकं यथा स्यादेवमिति क्रियाविशेषणम् । ईषत्-पाकश्चैकदेशपाकेन । रक्तक्षयोपद्रवपीड़ित-त्वात् रक्तक्षयोपद्रवाः सुश्रुतेनोक्ताः । तैः पीड़ितत्वात् अर्ब्बुदपीड़ितः ॥ * ॥ अथार्ब्बुदस्य चिकित्सा ।
'ग्रन्थ्यर्ब्बुदानां न यतो विशेषः
प्रदेशहेत्वाकृतिदोषदूष्यैः ।
अतश्चिकित्सेद्भिषगर्ब्बुदानि
विधानविद्ग्रन्थिचिकित्सितेन ॥
हरिद्रालोध्रपत्तङ्गगृहधूममनःशिलाः ।
मधुप्रगाढ़ो लेपोऽयं मेदोऽर्ब्बुदहरः परः ॥
मलकस्य कृतः क्षारो हरिद्रायास्तथैव च ।
शङ्खचूर्णेन संयुक्तो लेपः सिद्धोऽर्ब्बुदापहः ॥
वटदुग्धकुष्ठरोमकलिप्तं बद्धं वटस्य पत्रेण ।
अथास्थि सप्तरात्रान्महदप्युपशान्तिमर्ब्बुदं
गच्छेत् ॥
शिग्रुमूलकयोर्ब्बीजं रक्षोघ्नं सुरसा यवम् ।
तक्रेणाश्वरिपुं पिष्ट्वा लिम्पेदर्ब्बुदशान्तये ॥'
रक्षोघ्नं सर्षपम् । सुरसा तुलसी । यवं इन्द्रयवम् । अश्वरिपुं करवीरम् ।" इति भावप्रकाशः ॥

रक्तार्शः, [स्] क्ली, (रक्तजनितमर्शः ।) अर्शो-रोगविशेषः । तस्य लक्षणमाह ।
"रक्तोल्वणा गुदे कीलाः पित्ताकृतिसमन्विताः ।
वटप्ररोहसदृशा गुञ्जाविद्रुमसन्निभाः ॥
तेऽत्यर्थं दुष्टमुष्णञ्च गाढ़विड्भिः प्रपीड़िताः ।
स्रवन्ति सहसा रक्तं तस्य चातिप्रवृत्तितः ॥
भेकाभः पीड्यते दुःखैः शोणितक्षयसम्भवैः ।
हीनवर्णबलोत्साहो हतौजाः कलुषेन्द्रियः ॥
विट्श्यावं कठिनं रूक्षमधो वायुर्न वर्त्तते ।
तनु चारुणवर्णञ्च फेणिलञ्चासृगर्शसाम् ॥
कट्यूरुगुदशूलञ्च दौर्ब्बल्यं यदि वाधिकम् ।
तत्रानुबन्धो वातस्य हेतुर्यदि च रूक्षणम् ॥
शिथिलं श्वेतपीतञ्च विट्स्निग्धं गुरु शीतलम् ।
यद्यर्शसां घनञ्चासृक् तन्तुमत्पाण्डु पिच्छिलम् ॥
गुदं सपिच्छं स्तिमितं गुरु स्निग्धञ्च कारणम् ।
श्लेष्मानुबन्धो विज्ञेयस्तत्र रक्तार्शसां बुधैः ॥
गुदे कीला अर्शांसि । पित्ताकृतिसमन्विताः पित्तार्शोलक्षणयुक्ताः । आकारेण च वटप्ररो-हादिसदृशाः । दुःखैः रोगैः । त्वक्पारुष्यास्य-शीतप्रार्थनादिभिः कलुषेन्द्रियः आकुलसर्व्वे-न्द्रियः । रक्तजस्यापि वातोल्वणस्य लक्षण-माह । तत्र रक्तार्शसि अनुबन्धः उल्वणत्वम् । रूक्षणं रूक्षयतीति रूक्षणं रूक्षं द्रव्यम् । पित्तोल्वणस्य लक्षणं रक्तोल्वणा गुदे कीला पित्ताकृतिसमन्विता इत्यादिनैवोक्तम् । रक्त-पित्तयोः समानलिङ्गत्वात् ॥ * ॥ कफोल्वणस्य लक्षणमाह । सपिच्छं पिच्छिलार्द्रस्तिमित-मार्द्रचर्म्मावगुण्ठितमिव । तस्य चिकित्सा ।
रक्तार्शसामुपेक्षेत रक्तमादौ स्रवद्भिषक् ।
दुष्टास्रेऽनिगृहीते स्युः शूलानाहासृगामयाः ॥
चन्दनकिराततिक्तकधन्वयवासाः सनागराः
कथिताः ।
रक्तार्शसां प्रशमना दार्व्वीत्वगुशीरनिम्बा वा ॥
चन्दनमत्र रक्तचन्दनम् । इति चन्दनादिक्वाथः ॥
नवनीततिलाभ्यासात्
केशरनवनीतशर्कराभ्यासात् ।
दधिसरमथिताभ्यासात्
गुदजाः शाम्यन्ति रक्तवहाः ॥
दध्नस्तूपरि यो भागो घनः स्नेहयुतः सरः ।
मथितं सररहितम् । निर्ज्जलं वस्त्रपूतं दधि ।
सपद्मकेशरं क्षौद्रं नवनीतं नवं लिहन् ।
सिताकेशरसंयुक्तं रक्तार्शःसु सुखी भवेत् ॥
पयसा शृतेन यूषैः षतीनमुद्गाढ़कीमसूराणाम् ।
ओदनमद्यादर्शैर्मधुरैरीषत्सुगन्धैश्च ।
समङ्गोत्पलमोचाह्वतिरीटतिलचन्दनैः ।
सिद्धं छागीपयो दद्याद्गुदजे शोणितात्मके ॥
समङ्गा लज्जालुः । मोचाह्वो मोचरसः । तिरीटो लोध्रः । चन्दनमत्र रक्तचन्दनम् । सम-ङ्गादिदुग्धम् ।
भावितं रजनीचूर्णं स्नुहीक्षीरैः पुनः पुनः ।
बन्धनात् सुदृढ़ं सूत्रं छिनत्त्यर्शो भगन्दरम् ॥
क्षारसूत्रम् ॥
नासानाभिसमुत्थेषु तथा मेढ्रादिजेष्वपि ।
क्रियामर्शःसु कुर्व्वीत तत्र तत्र यथोदिताम् ॥
चर्म्मकीलन्तु संछिद्य दहेत् क्षारेण चाग्निना ।
वेगावरोधस्त्रीपृष्ठयानान्युत्कटकासनम् ।
यथास्वं दोषलञ्चान्नमर्शसः परिवर्ज्जयेत् ॥"
इति भावप्रकाशः ॥
(यथा चास्य लक्षणानि ।
"रक्तजानि न्यग्रोधप्ररोहविद्रुमकाकणन्तिका-फलसदृशानि पित्तलक्षणानि च यदावगाढ़-पुरीषप्रपीड़ितानि भवन्ति तदात्यर्थं दुष्टमनल्प-मसृक् सहसा विसृजन्ति तस्यैवातिप्रवृत्तौ शोणि-तातियोगोपद्रवा भवन्ति ।" इति सुश्रुते निदान-स्थाने द्वितीयेऽध्याये ॥ अथास्य चिकित्सा ।
"रक्तार्शसामुपचारं वक्ष्यामि शृणु पुत्रक ! ।
प्रातस्तिलान् भक्षयेच्च नवनीतविमिश्रितान् ॥
सितानागरसंयुक्तं नवनीतं सशर्करम् ।
केशरं मातुलुङ्गस्य विड़ङ्गशर्करायुतम् ॥
भक्षेत् कुष्माण्डावलेहं नवनीतेन शर्कराम् ।
एतेन रक्तगुदजान् शमयन्ति विचक्षणाः ॥
समङ्गा शाल्मलीपुष्पं चन्दनं ककुभत्वचम् ।
नीलोत्पलमजाक्षीरं पिष्ट्वा पानमस्र्गदान् ॥
कुटजमूलसकेशरमुत्पलं
खदिरधातकिमूलशृतं पयः ।
पिबति न्नक्षणयोगमसृग्भवं
गुदजवेदनसङ्गविनाशनम् ॥"
इति रक्तार्शश्चिकित्सा ॥
इति हारीते चिकित्सितस्थाने १२ अध्यायः ॥)

रक्तालुः, पुं, (रक्तः रक्तवर्णः आलुः ।) रक्त-वर्णालुविशेषः । शकरकन्द आलु इति भाषा ॥ तत्पर्य्यायः । रक्तपिण्डालुः २ रक्तपिण्डकः ३ लोहितः ४ रक्तकन्दः ५ लोहितालुः ६ । अस्य गुणाः । शीतत्वम् । मधुराम्लत्वम् । श्रमपित्त-दाहापहत्वम् । वृष्यत्वम् । बलपुष्टिकारित्वम् । गुरुत्वञ्च । इति राजनिर्घण्टः ॥

रक्तिका, स्त्री, (रक्तो रक्तवर्णोऽस्त्यस्याः । रक्त + "अत इनिठनौ ।" ५।२।११५ । इति ठन् ।) गुञ्जा । (अस्याः पर्य्यायो यथा,—
"साहुण्ठा लघ्यला गुञ्जा रक्तिका काकणन्तिका ।
काकादनी काकतिक्ता काकजङ्घा शिखण्डनी ॥"
इति वैद्यकरत्नमालायाम् ॥
"रक्ता सा काकचिञ्ची स्यात् काकणन्ती च
रक्तिका ।
काकादनी काकपीलुः सा स्मृता काकवल्लरी ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)